STOTRADHWANI

# 4 - चतुर्थ दशकम्

## योगाभ्यासः तथा योगसिद्धिः

कल्यतां मम कुरुष्व तावतीं कल्यते भव दुपासनं यया ।
स्पष्ट मष्ट विधयोग चर्यया पुष्टयाशु तव तुष्टि माप्नुयाम् ॥ ॥4-1॥

ब्रह्मचर्य दृढतादिभिर् यमैः आप्लवादि नियमैश्च पाविताः ।
कुर्महे दृढममी सुखासनं पङ्कजाद्य मपि वा भवत्पराः ॥ ॥4-2॥

तारमन्त रनुचिन्त्य सन्ततं प्राणवायु मभियम्य निर्मलाः ।
इन्द्रियाणि विषयाद थाप हृत्य आस्महे भव दुपासनोन् मुखाः॥ ॥4-3॥

अस्फुटे वपुषि ते प्रयत्नतो धारयेम धिषणां मुहुर्मुहुः ।
तेन भक्ति रस मन्तरार्द्रतां उद्वहेम भवदङ्घ्रि चिन्तका ॥ ॥4-4॥

विस्फुटा वयव भेद सुन्दरं त्वद्वपुस् सुचिर शीलना वशात् ।
अश्रमं मनसि चिन्तयामहे ध्यान योग निरतास् त्वदाश्रयाः ॥ ॥4-5॥

ध्यायतां सकल मूर्ति मीदृशीम् उन्मिषन् मधुरता हृतात्मनाम् ।
सान्द्र मोद रस रूप मान्तरं ब्रह्म रूपमयि तेऽव भासते ॥ ॥4-6॥

तत् समास्वदन रूपिणीं स्थितिं त्वत् समाधि मयि विश्व नायक ।
आश्रिताः पुनरतः परिच्युतौ आरभे महि च धारणादिकम्॥ ॥4-7॥

इत्थ मभ्यसन निर्भरोल्लसत् त्वत् परात्म सुख कल्पितोत्सवाः ।
मुक्त भक्त कुल मौलितां गताः सञ्चरेम शुक नारदादि वत् ॥ ॥4-8॥

त्वत् समाधि विजये तु यः पुनः मङ्क्षु मोक्षरसिकः क्रमेण वा ।
योग वश्य मनिलं षडाश्रयैः रुन्नयत्यज सुषुम्नया शनैः ॥ ॥4-9॥

लिङ्ग देह मपि सन्त्यज न्नथो लीयते त्वयि परे निराग्रहः ।
ऊर्ध्व लोक कुतुकी तु मूर्धतः सार्धमेव करणैर् निरीयते ॥ ॥4-10॥

अग्नि वासर वलर्क्ष पक्षगैः उत्तरायण जुषा च दैवतैः ।
प्रापितो रविपदं भवत्परः मोदवान् ध्रुव पदान्त मीयते ॥ ॥4-11॥

आस्थितोऽथ महरालये यदा शेष वक्त्र दहनोष्मणार्द्यते ।
ईयते भवदु पाश्रयस् तदा वेधसः पदमतः पुरैव वा ॥ ॥4-12॥

तत्र वा तव पदेऽथवा वसन् प्राकृत प्रलय एति मुक्तताम् ।
स्वेच्छया खलु पुरा विमुच्यते संविभिद्य जगदण्ड मोजसा ॥ ॥4-13॥

तस्य च क्षिति पयो महोऽनिल द्योमहत् प्रकृति सप्तका वृतीः ।
तत् तदात्म कतया विशन् सुखी याति ते पदमना वृतं विभो ॥ ॥4-14॥

अर्चिरादि गति मीदृशीं व्रजन् विच्युतिं न भजते जगत्पते ।
सच्चिदात्मक भवत् गुणोदयान् उच्चरन्त मनिलेश पाहि माम् ॥4-15॥

॥ सदा सर्वत्र गोविन्द नाम संकीर्तनम् गोविन्दा....गोविन्दा ॥
॥ श्री गुरुवायूरप्पा शरणम् श्री हरये नमः॥

e